# .. hanumadaShTottarashatanAmAvaliH 5 ..

# ॥ हनुमदष्टोत्तरशतनामावलिः ५ ॥

## Document Information

Text title : hanumadaShTottarashatanAmAvaliH 5
File name : hanumadaShTottarashatanAmAvaliH5.itx
Category : aShTottarashatanAmAvalI
Location : doc_hanumaana
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : Shri Devi Kumar, refined by PSA Easwaran
Proofread by : PSA Easwaran psaeaswaran at gmail
Description-comments : From Hanumatstutimanjari, Mahaperiaval Publication
Acknowledge-Permission: Mahaperiyaval Trust
Latest update : April 24, 2016
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ हनुमदष्टोत्तरशतनामावलिः ५ ॥

(रामनामाङ्किता)

ॐ रामदूताय नमः । रामभृत्याय । रामचित्तापहारकाय ।
रामनामजपासक्ताय । रामकीर्तिप्रचारकाय । रामालिङ्गनसौख्यज्ञाय ।
रामविक्रमहर्षिताय । रामबाणप्रभावज्ञाय । रामसेवाधुरन्धराय ।
रामहृत्पद्ममार्ताण्डाय । रामसङ्कल्पपूरकाय । रामामोदितवाग्वृत्तये ।
रामसन्देशवाहकाय । रामतारकगुह्यज्ञाय । रामाह्लादनपण्डिताय ।
रामभूपालसचिवाय । रामधर्मप्रवर्तकाय । रामानुजप्राणदात्रे ।
रामभक्तिलतासुमाय । रामचन्द्रजयाशंसिने नमः । २०
ॐ रामधैर्यप्रवर्धकाय नमः । रामप्रभावतत्त्वज्ञाय ।
रामपूजनतत्पराय । राममान्याय । रामहृद्याय । रामकृत्यपरायणाय ।
रामसौलभ्यसंवेत्त्रे । रामानुग्रहसाधकाय ।
रामार्पितवचश्चित्तदेहवृत्तिप्रवर्तिताय । रामसामुद्रिकाभिज्ञाय ।
रामपादाब्जषट्पदाय । रामायणमहामालामध्याञ्चितमहामणये ।
रामायणरसास्वादस्रवदश्रुपरिप्लुताय ।
रामकोदण्डटङ्कारसहकारिमहास्वनाय ।
रामसायूज्यसाम्राज्यद्वारोद्घाटनकर्मकृते ।
रामपादाब्जनिष्यन्दिमधुमाधुर्यलोलुपाय ।
रामकैङ्कर्यमात्रैकपुरुषार्थकृतादराय ।
रामायणमहाम्भोधिमथनोत्थसुधाघटाय ।
रामाख्यकामधुग्दोग्ध्रे । रामवक्त्रेन्दुसागराय नमः । ४०
ॐ रामचन्द्रकरस्पर्शद्रवच्छीतकरोपलाय नमः ।
रामायणमहाकाव्यशुक्तिनिक्षिप्तमौक्तिकाय ।
रामायणमहारण्यविहाररतकेसरिणे ।
रामपत्न्येकपत्नीत्वसपत्नायितभक्तिमते ।
रामेङ्गितरहस्यज्ञाय । राममन्त्रप्रयोगविदे ।
रामविक्रमवर्षर्तुपूर्वभूनीलनीरदाय ।
रामकारुण्यमार्तण्डप्रागुद्यदरुणायिताय ।
रामराज्याभिषेकाम्बुपवित्रीकृतमस्तकाय ।
रामविश्लेषदावाग्निशमनोद्यतनीरदाय ।
रामायणवियद्गङ्गाकल्लोलायितकीर्तिमते ।
रामप्रपन्नवात्सल्यव्रततात्पर्यकोविदाय ।
रामाख्यानसमाश्वस्तसीतामानससंशयाय ।
रामसुग्रीवमैत्र्याख्यहव्यवाहेन्धनायिताय ।

रामाङ्गुलीयमाहात्म्यसमेधितपराक्रमाय ।
रामार्तिध्वंसनचणचूडामणिलसत्कराय ।
रामनाममधुस्यन्दद्धृदनाम्बुजशोभिताय ।
रामनामप्रभावेण गोष्पदीकृतवारिधये ।
रामौदार्यप्रदीपार्चिर्वर्धकस्नेहविग्रहाय ।
रामश्रीमुखजीमूतवर्षणोन्मुखचातकाय नमः । ६०
ॐ रामभक्त्येकसुलभब्रह्मचर्यव्रते स्थिताय नमः ।
रामलक्ष्मणसंवाहकृतार्थीकृतदोर्युगाय ।
रामलक्ष्मणसीताख्यत्रयीराजितहृद्गुहाय ।
रामरावणसङ्ग्रामवीक्षणोत्फुल्लविग्रहाय ।
रामानुजेन्द्रजिद्युद्धलब्धव्रणकिणाङ्किताय ।
रामब्रह्मानुसन्धानविधिदीक्षाप्रदायकाय ।
रामरावणसङ्ग्राममहाध्वरविधानकृते ।
रामनाममहारत्ननिक्षेपमणिपेटकाय ।
रामताराधिपज्योत्स्नापानोन्मत्तचकोरकाय ।
रामायणाख्यसौवर्णपञ्जरस्थितशारिकाय ।
रामवृत्तान्तविध्वस्तसीताहृदयशल्यकाय ।
रामसन्देशवर्षाम्बुवहन्नीलपयोधराय ।
रामराकाहिमकरज्योत्स्नाधवलविग्रहाय ।
रामसेवामहायज्ञदीक्षिताय । रामजीवनाय ।
रामप्राणाय । रामवित्ताय । रामायत्तकलेवराय ।
रामशोकाशोकवनभञ्जनोद्यत्प्रभञ्जनाय ।
रामप्रीतिवसन्तर्तुसूचकायितकोकिलाय नमः । ८०
ॐ रामकार्यार्थोपरोधदूरोत्सारणलम्पटाय नमः ।
रामायणसरोजस्थहंसाय । रामहिते रताय ।
रामानुजक्रोधवह्निदग्धसुग्रीवरक्षकाय ।
रामसौहार्दकल्पद्रुसुमोद्गमनदोहदाय । रामेषुगतिसंवेत्त्रे ।
रामजैत्ररथध्वजाय । रामब्रह्मनिदिध्यासनिरताय । रामवल्लभाय ।
रामसीताख्ययुगलयोजकाय । राममानिताय । रामसेनाग्रण्ये ।
रामकीर्तिघोषणडिण्डमाय । रामेतिद्व्यक्षराकारकवचावृतविग्रहाय ।
रामायणमहावृक्षफलासक्तकपीश्वराय ।
रामपादाश्रयान्वेषिविभीषणविचारविदे ।
राममाहात्म्यसर्वस्वाय । रामसद्गुणगायकाय ।
रामजायाविषादाग्निनिर्दग्धरिपुसैनिकाय ।
रामकल्पद्रुमूलस्थाय नमः । १००

ॐ रामजीमूतवैद्युताय नमः । रामन्यस्तसमस्ताशाय ।
रामविश्वासभाजनाय । रामप्रभावरचितशैत्यवालाग्निशोभिताय ।
रामभद्राश्रयोपात्तधीरोदात्तगुणाकराय ।
रामदक्षिणहस्ताब्जमुकुटोद्भासिमस्तकाय ।
रामश्रीवदनोद्भासिस्मितोत्पुलकमूर्तिमते ।
रामब्रह्मानुभूत्याप्तपूर्णानन्दनिमज्जिताय नमः । १०८

From Hanumatstutimanjari, Mahaperiaval Publication
Proofread by PSA Easwaran psaeaswaran at gmail

.. hanumadaShTottarashatanAmAvaliH 5 ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*